# अहिंसाया अन्तर्लापिः

—डॉ० केशवचन्द्र दाशः
दर्शन-प्राध्यापक श्री जगन्नाथ संस्कृत विश्वविद्यालय पुरी—७५२००२

अनेकधर्मात्मकः संसारः। नानाभावात्मकं च वस्तु। प्रतिपिण्डम् अनन्तगुणाः। प्रतिखण्डं नैके पर्यायाः। तथापि अखण्डा वस्तुनः अभिव्यक्तिः। अत्र विरोधाऽविरोधयोः विचार आपेक्षिकः। विधिप्रतिषेधविकल्पतले वचनविन्यासो भंगीप्रियः। किन्तु व्याख्यानच्छलेन मूलतत्त्वं नानायते। तथापि एकान्ततो न विधिः न वा निषेधः। देशकालयोः परिच्छिन्नपरिधिः विवेचनस्वरूपे नियामकः। विवक्षा सापेक्षिकी। विवक्षितपदार्थः न सर्वात्मना गौणः न वा प्रधानः। अतः स्यात्कारः अप्रयुक्तोऽपि व्यवस्थापकः। अनेकान्तो वाच्यरूपेण व्यवस्थाप्यः। दृष्टिरत्र प्रतिपक्षसापेक्षिणी। अविरोधानुरोधेन विमर्शो वस्तुनः स्वरूपं स्पृशति। अतः वस्तुविश्लेषणे अहिंसामयी प्रक्रियाऽत्र अभिव्यक्तेः सामञ्जस्यं वहति। स्यात्कारश्च न सम्भावितार्थे, न कथंचित्पर्याये, न सन्देहपरिसरे, न वा अज्ञेयवादस्य अचिन्त्यकोलाहले पर्यवस्यति।

वस्तुतः मैत्रीभावनातले अहिंसादृष्टिः अनेकान्तवादिनी। दृष्टिसीमां परिबध्नाति स्यान्निश्चयः। नेतिकारं परिपुष्णाति अविद्वेषविवेकः। नेतिकारे विरोधः शाश्वतिकः। परं दृष्टिभेदे विरोधो भिन्नः। अविरोधे अविद्वेषः अवश्यम्भावी। किन्तु ह्रास-विकासयोः प्रवाहप्रसरे धरा परिणामिनी। वस्तु परिवर्त्तते। अर्थोऽपि विवर्त्तते। अतः प्रथमकल्पे अहिंसा हिंसाया नेतिकारे नियमबद्धाऽभूत्। तदनुभावात्मकः कश्चित् कल्प उदितः। हिंसाभावस्य निषेधः सिद्धान्तरूपेण स्वीकृतः। विचारे तत्वं पर्युषितम्। हिंसाया लक्षणनिरूपणे कर्मवाद उत्थापितः। कर्मणश्च सीमांकनं स्पष्टीकृतम्। हिंस्रसंज्ञया प्रवृत्तिप्रसरो निरूपितः। अहिंसाया भावरूपा अभिव्यक्तिः मैत्रीरूपं निजीकृतवती, जीवनयज्ञस्य कर्मवलये इयम् आचारस्तरं समागता। आचारे नियमो लिपिबद्धः। आचारस्य अनुशासनरूपेण अहिंसा कल्याणस्य सरणिरभूत्। ततश्च धर्मविधौ एषा भिन्नदिशा विकसिता। सकलकर्मबन्धे अस्याः तत्वं समुपस्थापितम्। इयं च सर्वभूतेभ्यो धर्मेभ्यो ज्यायसी मता। तदनु सकलभावकर्मणां मूलबिंदुरूपेण अहिंसा परमविद्या संजाता। सैद्धान्तिकस्तरे महाभारतकाले अहिंसायाः पूर्णविकासः परिलक्ष्यते—"अहिंसा परमो धर्मस्तथाऽहिंसा परं तपः। अहिंसा परमं सत्यं यतो धर्मः प्रवर्त्तते।" (अनुशासन पर्व, ११५/२३) पुराणप्रवर्त्तितधर्मेषु उत्तमधर्मरूपेण अहिंसा पुण्यसाधिका संजाता। कालेऽस्मिन् हिंसाविरोधभावस्य कश्चित् प्रगुणितकल्पः जनसम्मुखे उपस्थापितः। अक्लेशकारित्वं च अहिंसाया निर्यासरूपेण



Jain Education International For Private & Personal Use Only www.jainelibrary.org

स्फुटीकृतम्। समनन्तरकाले परपीडाविवर्जनरूपं हिंसाविरोधकर्म अहिंसायाः सामूहिकसमुद्घोषः संजातः। न केवलं मानसिकस्तरे अपितु कर्मस्तरे अहिंसा पुण्यस्य प्रथमा भित्तिरिति सिद्धान्तितम्। वस्तुतः अनेन प्रत्यक्षकर्मणि प्रायोगिकस्तरे वा अहिंसायाः प्रतिफलनं स्पष्टतरं नाऽभूत्। सिद्धान्तरूपेण अस्याः महत्वं प्रतिष्ठापितम्। तथापि व्यवहारे सम्यक्रूपता नोपलब्धा। अतः अभ्यासनिमित्तं कश्चित् दार्शनिको विधिः परिकल्पितः। योगशास्त्रे अहिंसा यमरूपेण (अहिंसा-सत्यास्तेय-ब्रह्मचर्य-परिग्रहाः यमाः—योग सूत्र २/३०) परिगणिता।

अपरन्तु "सर्ववर्णानां स्वधर्मानुष्ठाने परमपरिमितं सुखम्" (अश्वलायन धर्म सूत्र २·१·२·२) इति वचनव्याख्यानपुरःसरं अहिंसातत्वविनिश्चये मध्यकाले काचित् विप्रतिपत्तिः व्यवहारकलापम् अवारुणत्। आत्म-देश-समाज-रक्षादृष्टया अहिंसामुररीकृत्य विचारः प्रवर्त्तितः। अहिंसा तत्वे रक्षातत्वं सन्निविष्टम्। रक्षातत्वस्य ऐकान्तिकशुद्धपक्षः अहिंसानिर्यासे अन्तर्भावितः। अतएव आचारसंहितायां "मित्रता" अहिंसार्थमलंकृतवती। इयं मित्रता यथा भावात्मिका तथैव आचारात्मिका। दृष्टिभेदे विप्रतिपत्तिमाशंक्य हितमात्रबुद्धि पुरस्कृत्य अहिंसानिर्वचनं विहितम्। आचारसंवलिता इयं मित्रता कल्याणमित्रता नाम्ना परिचिता। तथापि कर्मनिरूपणे अहिंसासिद्धान्तस्य दृढ़ता न स्फुटतरा। अतः परकाले सिद्धान्तेऽस्मिन् "समता" परिपोषकरेखारूपेण मार्गं निरदिशत्। व्रतधारायां तु अहिंसा यथा विधेयात्मिका तथैव निषेधात्मिका आसीत्।

प्रचलितासु धार्मिकपरम्परासु रुचिवैचित्र्यात् अहिंसा प्रीतिप्रधाना दयाभावापन्ना च उपलभ्यते। अहिंसाया मूलतत्त्वे प्रीतिप्राणता लनवद्यकलारूपेण मानविकसद्भावस्य उद्घोषिकाऽभवत्। तत्र च जीवमात्रं दया आचारस्य मौलिकी अनुक्रमणी संजाता। अहिंसाया आध्यात्मिक पक्षः धर्मप्रचारस्य आदर्शोऽभवत्। अयमादर्शः जीवमात्रस्य अधिकार इत्यपि सन्दर्भसारः संजातः। वस्तुतः विश्वस्य धार्मिक प्रवर्त्तनासु ईश्वरनश्वरयोः अन्तरतमचेतनातले अहिंसायाः न केवलं वैचारिकपक्षः अपितु आचारकल्पः प्रमुखविन्दुरूपेण निदानायितः। सर्वत्र सर्वदा च कालदृष्टया परिस्थितिरेव अहिंसाया नियामिका प्रतीयते।

जैननये तु अहिंसा विशेषनीतित्वेन अंगीकृता। ज्ञानाधिकारे ज्ञेयत्वाधिकारे चारित्राधिकारे च अहिंसा परिणामस्वरूपिणी एका आधारशिला। शुद्धिप्रकरणे इयमेव नियन्त्रिका। अतएव हिंसानिर्वचने प्रथमतः 'प्रमत्तयोगात् प्राणव्यपरोपणं हिंसा' (उमास्वाति—तत्त्वार्थसूत्रम्—७/८.) इति प्राणव्यपरोपणस्य प्राधान्यं दत्तम्। प्राणपर्याये भावप्राण-द्रव्यप्राणभेदो विनिश्चितः। हिंसायाः कारणकोटिषु विषयकषायादीनाम् अन्तर्भावो विहितः। स्वहिंसा-परहिंसा-प्रकारद्वये हिंसाया विभागः कृतः। हिंसाव्यापारे 'हिंस्य-हिंसक-हिंसा' इति स्तरत्रयं निर्णीतम्। भावहिंसायां द्रव्यहिंसायां वा कषाय एव मूलभित्तिरिति निर्धारितम्। अयं च कषायः प्रवृत्तौ प्रमादः अथवा आविलता इत्यपि विनिश्चितम्।

अहिंसाया विधेयात्मकपरिसरे प्रधान्येन दया अहिंसार्थयामुखीकरोति। दयापदेन द्रव्यदया-भावदया-स्वदया-परदया-प्रभृतयः प्रतिपाद्यन्ते। तथापि सैद्धान्तिकपक्ष-व्यवहारपक्षयोः समन्वये कचित् विच्युतिः अहिंसातत्त्वे असामञ्जस्यमुपस्थापयति। हिंसाया निषेधात्मक व्यापारे हि सर्वत्र गुरुत्वं दृश्यते। सर्वतोभावेन हिंसाया न्यूनीकरणमेव अहिंसाया प्रायोगिकतत्त्वमिति सिद्धान्तितम्।

आधुनिककालेऽस्मिन् अहिंसा न केवलं दयापर्याये अपितु त्यागधर्मे सन्निविष्टा। त्यागोऽत्र न संसारत्यागः। किन्तु स्वार्थत्यागः। अहमर्थस्य परिधिपरिसरे यावत् दुष्प्रवृत्तिपरित्यागः। विमर्शविशेषे इयमेका मानसिकी स्थितिरूपेण चित्रिता, पुनश्च सत्यस्य अधिष्ठाने अहिंसाया स्वरूपं विशदीकृतम्। धार्मिकक्षेत्रे नैतिक जीवने च


Jain Education International For Private & Personal Use Only www.jainelibrary.org

अहिंसायाः प्रयोगो बहुलतया प्रतिफलितः। किन्तु सामाजिकजीवने न सत्यनिष्ठाया न वा अहिंसायाः तथा प्रभावः परिलक्षितः।

एवं वैदिकयुगतः सांप्रतिककालपर्यन्तम् अहिंसा धर्म-व्रत-दयाभावेन, पुण्यस्य निदानरूपेण, विधेयात्मक पुण्य व्यापाररूपेण, श्रेष्ठाचाररूपेण, विशेषनीतिरूपेण, त्यागस्य आधाररूपेण, हिंसायाः न्यूनीकृतकल्परूपेण, सत्यस्य पुष्पिततात्पर्यभावेन, शान्तेः आधारशिलात्वेन उपवर्णिता।

परन्तु युगोऽयम् अर्थकेन्द्रिकः। स्वार्थाय जनानां प्रवृत्तिः। प्रवृत्तेः निषेधस्तु कोलाहलाय भवति। निषेधद्वारा न लाभः। अपरन्तु हानिः। अतः प्रवृत्तेः परिष्करणं संस्कारो वा अपेक्ष्यते। संस्कारो नाम अत्र दोषापनयनं गुणाधानं च। तत् कथं भवेदिति चिन्ताया विषयः। वस्तुतः अत्र काठिन्यं नास्ति। अहिंसातत्त्वे स उपायो निहितः। तस्य उपयोग आवश्यकः।

अहिंसा नाम न केवल दया न वा केवला अनुकम्पाभावना, न हिंसाविरोधिता, न वा केवला मैत्रीचेतना। न पुनः काचित एकचक्षुष्का सत्यशीला नीतिः। न वा केवलः परित्यागः। सर्वमेतत् अहिंसायाः परिपोषकं तत्त्वम्। निवृत्तिस्वाधिष्ठाने प्रतीकारपरायणता अत्र अहिंसा। इयं च करुणापदेन सामञ्जस्यमावहति। अतः अहिंसायाः अन्तर्लापः करुणा। करुणाऽत्र करणीयं प्रस्तौति। प्रतिभावं किमपि करणीयमस्ति। करणीयं च विसर्गपरकम्। भावश्च प्रतीकारात्मकः। स च वैपुल्यसिक्तः।

पारम्परिक व्युत्पत्तया करुणा 'कृ'—धातुतो (√कृ+उनन्—कृवृदारभ्य उनन्'—उणादिसूत्रम्—३३३) निष्पन्नः। अर्थोऽत्र विक्षिप्तभावः अथवा विकीर्णता। प्राशस्त्यमत्र अन्तः स्वरः।

अतः निवृत्तिस्वाधिष्ठाने प्रशस्तचेतसा वैपुल्येन प्रतीकारपरायणता एव अहिंसा इति सिद्ध्यति।

## सन्दर्भ स्थल

सहायक ग्रन्थसूची—


| | |
|---|---|
| १. अमर मुनि (सम्पादक) | : **जैन तत्व कलिका** आत्मज्ञानपीठ, मनसा मण्डी (पंजाब) १९८२ |
| २. जगदीशचन्द्र जैन (व्याख्याकार) | : **मल्लिषेण सूरिकृत स्याद्वाद मञ्जरी**, श्रीमद् राजचन्द्र आश्रम, गुजरात, १९७० |
| ३. भागचन्द्र जैन | : **अनेकान्तवाद** वीरसेवा मन्दिर ट्रस्ट प्रकाशन, वाराणसी १९७७ |
| ४. मोहनलाल मेहता | : **अन्तर्निरीक्षण** जैन संस्कृत संशोधन मण्डल बनारस, १९५१ |
| ५. लालचन्द्र जैन | : **जैनदर्शन में आत्मविचार** पार्श्वनाथ विद्याश्रम शोध संस्थान, वाराणसी १९८४ |
| ६. वशिष्ठनारायण सिन्हा | : **जैन धर्म में अहिंसा** सोहनलाल जैनधर्म प्रचारकसमिति गुरु बाजार, अमृतसर, १९७२ |
| ७. सुखलाल संघवी (व्याख्याकार) | : **उमास्वातिकृत तत्वार्थ सूत्रम्** पार्श्वनाथ विद्याश्रम शोध संस्थान, वाराणसी, १९५२ |
| ८. Nathmal Tatia | : Studies in Jaina Philosophy P. V. Research Institute Jainashram, B. H. U. Varanasi 1951 |





Jain Education International For Private & Personal Use Only www.jainelibrary.org